ज्ञेयानि । [1]फाण्टः[A], [2]फणितिः, [3]फेणिवान् - पेफणिवान्, [B]फणितः । इति इमानि रूपाणि अस्य धातोर्भवन्तीति विशेषः ।

(1089) " फल निष्पत्तौ " (I-भ्वादिः-530. अक. सेट्. पर.)

' निष्पत्तिः=सिद्धिः ।' इति क्षीरस्वामी ।

' फलेर्विशरणे फुल्लं फलितं फलति त्रयम् ॥

आदितो, ऽनादितस्त्वन्त्ये रूपे निष्पत्तिवाचिनः ।' (श्लो. 158-159) इति देवः ।

फालकः-लिका, फालकः-लिका, पिफलिषकः-षिका, पाफलकः-लिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिककलतिवत् (174) ज्ञेयानि । फलितम्, [4]फलम्, [5]त्रिफला, [6]संफला-भस्त्रफला-अजिनफला-शणफला-पिण्डफला,

---

1. ' क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु ' (7-2-18) इत्यनेनास्य धातोर्निष्ठायाम्, अनायाससाध्यकषायविशेषश्चेत् प्रकृतिप्रत्ययसमुदायेनोच्यते तदानीमिडभावो निपात्यते । 'अनुनासिकस्य क्विझलोः क्ङिति ' (6-4-15) इति दीर्घः । पश्चात्, ' ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वेन निष्ठातकारस्य टकारः । अन्यत्र फणितमित्येव ।
' उष्णाम्बुन्यौषधं क्षुण्णं क्षिप्त्वा सद्योऽभिषुत्य च ।
पीयते यः कषायोऽसौ फाण्टोऽनायाससाधितः॥' इति प्र. सर्वस्वे ।
माधवस्तु ' तद्वै नवनीतं घृतं देवानाम्, फाण्टं मनुष्याणाम्—' इति शतपथश्रुतिव्याख्यायाम् (3-1-3-8) 'नवनीतं फाण्टघृतयोरन्तरालवर्ति ' इत्याह । तेन नवनीतभावात् प्रागवस्थापन्नं द्रव्यं फाण्टम् इति लभ्यते । धातुवृत्तौ तु ' औषधस्य पञ्च कल्पनाः—रसः, कल्कः, शृतः, शीतः, क्वाथः । शीतो नाम क्षुण्णमौषधमुदके प्रक्षिप्य रात्रावधिवासितं यदुदकं प्रातः पीयते तत् । तदेवोष्णोदके प्रक्षिप्य सद्योऽभिषुत्य पूत्वा पीयते । स फाण्ट इति तद्विदः ।' इत्याह ।
2. क्तिनि, 'तितुत्रेष्वग्रहादीनाम्—' (वा. 7-2-9) इति वचनात् इडिति ज्ञेयम् । धातूनामनेकार्थकत्वाद् अत्र शब्दार्थकत्वमित्यपि ज्ञेयम् ।
3. कर्तरि लिटः क्वसौ, ' फणां च सप्तानाम् ' (6-4-125) इत्येत्वाभ्यासलोपविकल्पः । ' वस्वेकाजाद्घसाम् ' (7-2-67) इतीट् ।
4. फलतीति फलम्, कर्तरि पचादित्वादच् । लोकप्रयोगात् क्लीबत्वम् ।
5. अजादिषु (4-1-4) दर्शनात् स्त्रियां टाप् भवति । ङीषपवादः ।
6. ' पाककर्णपर्णपुष्पफल—' (4-1-64) इति प्राप्तं ङीषं बाधित्वा, ' संभस्त्राजिनशणपिण्डेभ्यः फलात् ' (ग. सू. 4-1-4) इति टाप् । भस्त्रफला इत्यत्र ' ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् ' (6-3-63) इति ह्रस्वः ।

A. ' अम्लिष्टनादा निरगुः फाण्टचित्रास्त्रपाणयः ॥' भ. का. 9.17.
B. ' दुष्टानपस्खादयितुं प्रयाते कृष्णे विलेपुः फणिता विमोहम् ॥' धा. का. 2.19.